STOTRADHWANI

## ३० त्रिंश दशकः - श्रीपार्वत्यवतारः

समाधिमग्ने गिरिशे विरिञ्चात् तपः प्रसन्नात्किल तारकाख्यः ।
दैत्यो वरं प्राप्य विजित्य देवान् सबान्धवः स्वर्ग सुखान्यभुङ्क्त १ ॥

वरैः स भर्गौ रसपुत्र मात्र वध्यत्वमाप्तोऽस्य च पत्यभावात् ।
सर्वाधिपत्यं स्वबलं च मोहात् मत्तो भृशं शाश्वतमेव मेने ॥ ३०-२॥

नष्टाखिलाः श्रीहरये सुरास्ते निवेदयामासु रशेष दुःखम् ।
स चाह देवा अनयेन नूनं उपेक्षते नो जननी कृपार्द्रा ॥ ३०-३॥

तद्विस्मृते र्जातमिदं करेण यष्ट्या च या ताडयति स्वपुत्रम् ।
तामेव बालः स निजेष्टदात्रीं सास्रं रुदन्मातर मभ्युपैति ॥ ३०-४॥

माता हि नः शक्ति रिमां प्रसन्नां कुर्याम भक्त्या तपसा च शीघ्रम् ।
सर्वापदः सैव हरिष्य तीति श्रुत्वामरास्त्वां नुनुवु र्महेशि ॥ ३०-५॥

निशम्य तेषां श्रुति वाक्य गर्भ स्तुतिं प्रसन्ना विबुधां स्त्वमात्थ ।
अलं विषादेन सुराः समस्तं जाने हरिष्यामि भयं द्रुतं वः ॥ ३०-६॥

हिमाद्रिपुत्री विबुधा स्तदर्थं जायेत गौरी मम शक्तिरेका ।
सा च प्रदेया वृषभ ध्वजाय तयोः सुतस्तं दितिजं च हन्यात् ॥ ३०-७॥

इत्थं निशम्या स्तभयेषु देवेषु अभ्यर्थिता देवि हिमाचलेन ।
त्वं वर्णयन्ती निजतत्त्वमेभ्यः प्रदर्शयामासिथ विश्वरूपम् ॥ ३०-८॥

सहस्रशीर्षं च सहस्रवक्त्रं सहस्रकर्णं च सहस्रनेत्रम् ।
सहस्रहस्तं च सहस्रपादं अनेक विद्युत्प्रभ मुज्ज्वलं च ॥ ३०-९॥

दृष्ट्वेद मीश्व र्यखिलैर्भि योक्ता त्वं चोप संहृत्य विराट्स्वरूपम् ।
कृपावती स्मेरमुखी पुनश्च निवृत्ति मार्गं गिरये न्यगादीः ॥ ३०-१०॥

उक्त्वाऽखिलं संसृति मुक्ति मार्गं सुरेषु पश्यत्सु तिरोदधाथ ।
श्रुत्वाऽद्रि मुख्यास्तव गीतमुच्चैः देवा जपध्यान परा बभूवुः ॥ ३०-११॥

अथैकदा प्रादु रभूद्धिमाद्रौ शाक्तं महो दक्षगृहे यथा प्राक् ।
क्रमेण तद्देवि बभूव कन्या सा पार्वतीति प्रथिता जगत्सु ॥ ३०-१२॥

हिमाद्रिणैषा च हराय दत्ता तयोः सुतः स्कन्द इति प्रसिद्धः ।
स तारकाख्यं दितिजं निहत्य ररक्ष लोका नखिलान् महेशि ॥ ३०-१३॥

दुर्वाससः शापबलेन शक्रो नष्टाखिलश्री र्वचनेन विष्णोः ।
क्षीरोदधिं सासुरदेव सङ्घो ममन्थ तस्मा दुदभूच्च लक्ष्मीः ॥ ३०-१४॥

या पूजि तेन्द्रेण रमा तवैका शक्तिः स्वरैश्वर्य पुनः प्रदानात् ।
शापान्मुने र्देवगणान्विमोच्य कटाक्षतस्ते हरिमाप भूयः ॥ ३०-१५॥

त्वं सर्वशक्तिर्न जिताऽसि केनापि अन्यान् जयस्येव सदा शरण्या ।
मातेव पत्नीव सुतेव वा त्वं विभासि भक्तस्य नमो नमस्ते ॥ ३०-१६॥

** हर नमः पार्वती पतये हर हर महादेव । **